श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४

*अष्टाङ्गयोगवर्णनं योगसिद्धिवर्णनं च*

कल्यतां मम कुरुष्व तावतीं कल्यते भवदुपासनं यया।
स्पष्टमष्टविधयोगचर्यया पुष्टयाऽऽशु तव तुष्टिमाप्नुयाम्॥ १ ॥

ब्रह्मचर्यदृढतादिभिर्यमैराप्लवादिनियमैश्च पाविताः।
कुर्महे दृढममी सुखासनं पङ्कजाद्यमपि वा भवत्पराः॥ २ ॥

तारमन्तरनुचिन्त्य सन्ततं प्राणवायुमभियम्य निर्मलाः।
इन्द्रियाणि विषयादथापहृत्याऽस्महे भवदुपासनोन्मुखाः॥ ३ ॥

अस्फुटे वपुषि ते प्रयत्नतो धारयेम धिषणां मुहुर्मुहुः।
तेन भक्तिरसमन्तरार्द्रतामुद्वहेम भवदङ्घ्रिचिन्तकाः॥ ४ ॥

विस्फुटावयवभेदसुन्दरं त्वद्वपुस्सुचिरशीलनावशात्।
अश्रमं मनसि चिन्तयामहे ध्यानयोगनिरतास्त्वदाश्रयाः॥ ५ ॥

ध्यायतां सकळमूर्तिमीदृशीमुन्मिषन्मधुरताहृतात्मनाम्।
सान्द्रमोदरसरूपमान्तरं ब्रह्मरूपमयि तेऽवभासते॥ ६ ॥

तत्समास्वदनरूपिणीं स्थितिं त्वत्समाधिमयि विश्वनायक।
आश्रिताः पुनरतः परिच्युतावारभेमहि च धारणादिकम्॥ ७ ॥

इत्थमभ्यसननिर्भरोल्लसत् त्वत्परात्मसुखकल्पितोत्सवाः।
मुक्तभक्तकुलमौलितां गताः सञ्चरेम शुकनारदादिवत्॥ ८ ॥

त्वत्समाधिविजये तु यः पुनर्मङ्क्षु मोक्षरसिकः क्रमेण वा।
योगवश्यमनिलं षडाश्रयैरुन्नयत्यज सुषुम्नया शनैः॥ ९ ॥

लिङ्गदेहमपि संत्यजन्नथो लीयते त्वयि परे निराग्रहः।
ऊर्ध्वलोककुतुकी तु मूर्धतस्सार्धमेव करणैर्निरीयते॥ १० ॥

अग्निवासरवलर्क्षपक्षगैरुत्तरायणजुषा च दैवतैः।
प्रापितो रविपदं भवत्परो मोदवान् ध्रुवपदान्तमीयते॥ ११ ॥

आस्थितोऽथ महरालये यदा शेषवक्त्रदहनोष्मणाऽऽर्द्यते।
ईयते भवदुपाश्रयस्तदा वेधसः पदमतः पुरैव वा॥ १२ ॥

तत्र वा तव पदेऽथवा वसन् प्राकृतप्रळय एति मुक्ततां।
स्वेच्छया खलु पुरा विमुच्यते संविभिद्य जगदण्डमोजसा॥ १३ ॥

तस्य च क्षितिपयोमहोनिलद्योमहत्प्रकृतिसप्तकावृतीः।
तत्तदात्मकतया विशन् सुखी याति ते पदमनावृतं विभो॥ १४ ॥

अर्चिरादिगतिमीदृशीं व्रजन् विच्युतिं न भजते जगत्पते।
सच्चिदात्मक भवद्गुणोदयानुच्चरन्तमनिलेश पाहि माम्॥ १५ ॥

**********